LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2019

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) शुकनासः कः आसीत् ? स कस्मै उपदेशं दत्तवान् ?

(ख) 'कादम्बरी' शब्दस्य अर्थः कः ? कीदृशः काव्यग्रन्थः कादम्बरी ?

(ग) लक्ष्मीः कस्मात् उत्थिता ? कथं सा 'अमृतसहोदरा' उच्यते ?

(घ) शुकनासोपदेशानुसारेण बुद्धिः कदा कालुष्यमुपयाति ?

(ङ) वसुजननी का ? कथं सा वसुजननी उच्यते ?

(च) लक्ष्मीः केषां समीपाद् दुरे तिष्ठति ?

(छ) शुकनासोपदेशे कः काम् अनार्य्याम् उवाच ?

(ज) शुकनासोपदेशस्य उत्सः कः ? अस्य ग्रन्थस्य रचयिता कः ?

2. अधोनिर्दिष्टं विषयद्वयम् आश्रित्य टीका लेख्या। 5×2 = 10

(क) व्यसनम्, (ख) गन्धर्वनगरलेखा, (ग) कालकूटः, (घ) मदजलम्, (ङ) वड़वानलः, (च) कुसुमशरः।

अथवा

अधोलिखितेषु पङक्तिद्वयं व्याख्येयम् – 5×2 = 10

(क) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातम् अप्युपकारपक्षे स्थापयन्ति।

(ख) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्ति अर्चनीयान्, नाभिवादयन्ति अभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

(ग) गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वरम् अमानुषशक्तित्वञ्चेति महतीयं खलु अनर्थपरम्परा। सर्वाविनयानाम् एकैकमपि एषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

## SECTION-B

3. कश्चित् एकः प्रश्नः समाधेयः – 10×1 = 10

(क) 'तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म – महामुनिः कुत्र समाधौ तिष्ठति स्म ? कदा तेन समाधिः अङ्गीकृतः ? कथं सः मृत्युं जितवान् ?

(ख) शिवराजविजयस्य प्रथमनिःश्वासमनुसृत्य श्रीमदम्बिकादत्तव्यासस्य रचनाशैली विलिख्यताम्।

4. अधोलिखितेषु विषयमेकम् अवलम्ब्य टीका लिख्यताम् – 5×1 = 5

(क) सकलकालनः करालः कालः।

(ख) सोमनाथतीर्थः।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्या कार्या – 5×1 = 5

(क) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य।

(ख) मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम् कश्चन प्रातःस्मरणीयः, स्वधर्माग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति।

## SECTION-C

5. संस्कृतगद्यसाहित्यमवलम्ब्य एकं नातिदीर्घं प्रबन्धं लिखतु। 10×1 = 10

अथवा

वाणभट्टस्य रचनाशैली वर्ण्यताम्। 10×1 = 10

6. कमपि एकं विषयमाश्रित्य टीका लिख्यताम् – 5×1 = 5

(क) वासवदत्ता, (ख) हर्षचरितम्।

अथवा

विषयमेकमवलम्ब्य व्याख्या कार्या। 5×1 = 5

(क) दण्डिनः पदलालित्यम्।

(ख) अपादः पदसन्तानो गद्यम्।

——×——